मालिना। पूज्यमानोऽप्सरोभिश्च ततो विष्णुपुरं व्रजेत्। कल्पकोटिशतं यावत्तस्मिन् लोके महीयते। कर्म्मच-यादिह पुनर्भुवि राजराजो भूपालमौलिमणिरञ्जित-पादपीठः। श्रद्धान्वितो भवति यज्ञसहस्रयाजी दीप्त-प्रतापजितसर्वमहीपलोकः। यो दीयमानमपि पश्यति भक्तियुक्तः कालान्तरे स्मरति वाचयतीह लोके। यो वा शृणोति पठतीन्द्रसमानरूपः प्राप्नोति धाम सपुरन्द-रदेवजुष्टम्"। अन्यविधानं हेमा० दा० दृश्यम् एतत् प्रयोगस्तु मत्कृततुलादानादिपद्धतौ दृश्यः।

२व्रतभेदे। तच्च व्रतं पञ्चदशदिनसाध्यमेकविंशतिदिन-साध्यञ्च यथा।

"पिन्याकाचामतक्रोदकसक्तूनामुपवासान्तरितोऽभ्य-व्यवहारास्तुलापुरुषः"। विष्णु० स०। "पिन्याका-चामतक्राम्बुसक्तूनां प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रः सौम्योऽयमुच्यते" इत्युपक्रमे "एषां त्रिरात्र-मभ्यासादेकैकस्य यथाविधि। तुलापुरुष इत्येष ज्ञेयः पञ्चदशाह्निकः"। एषां पिन्याकादीनां पञ्चानां क्रमे-णैकैकस्य त्रिरात्राभ्यासेन पञ्चदशाहव्यापी तुलापुरुषाख्यः कृच्छ्रो वेदितव्यः। अत्र पञ्चदशाह्निकत्वविधानादुप-वासस्य निवृत्तिः। यमेन त्वेकविंशतिरात्रिकस्तुलापुरुष उक्तः "आचाममथ पिन्याकं तक्रञ्चोदकसक्तुकान्। त्र्यहं त्र्यहम्प्रयुञ्जानो वायुभक्षस्त्र्यहद्वयम्। एकविंशति-रात्रन्तु तुलापुरुष उच्यते इति"।

**तुलाप्रग्र(ग्रा)ह** पु० प्र+ग्रह वा अप् पक्षे अप् ६त०। १तुला-सूत्रे सि० कौ०। [ल्युट्। १तुलादण्डे शब्दार्थचि०।

**तुलामान** न० तुलार्थं तोलनार्थं मानं मीयतेऽनेन मा—करणे

**तुलायष्टि** स्त्री ६त०। १तुलादण्डे। "स्तोकेनोन्नतिमा-याति स्तोकेनायात्यधोगतिम्। अहो सुसदृशी चेष्टा तुलायष्टेः खलस्य च" पञ्चत०।

**तुलावीज** न० तुलायाः तोलनस्य वीजं मूलम्। १गुञ्जायाम् तदारभ्यैव हि मानं शास्त्रे दर्शितं यथा "दशार्द्धगुञ्जं प्रवदन्ति माषमिति" लीला०। [दण्डस्थितसूत्रे मध्यद्वे अमरः।

**तुलासूत्र** न० तुलार्थं तोलनार्थं सूत्रम्। तोलनार्थं तुला-

**तुलि(ली)** स्त्री तुरि(री)+रस्य लः। तुर्य्यां शब्दरत्ना०।

**तुलिका** स्त्री तुल—बा० क्वुन्। खञ्जनिकायां त्रिका०।

**तुलित** त्रि० तुला+तत्करोति णिच्—कर्म्मणि क्त। १परिमिते "येऽपीन्द्रपाणितुलितायुधलूनपक्षाः" माघः। २सदृशीकृते

**तु(तू)लिनी** स्त्री तूलं विद्यते फलेऽस्याः इनि ङीप् वा पृषो० ह्रस्वः। १शाल्मलिवृक्षे रत्नमाला।

**तु(तू)लिफला** स्त्री तुलि तूलयुक्तं फलमस्याः वा पृषो०। १शाल्मलीवृक्षे रत्नमाला।

**तुल्य** त्रि० तुलया सम्मितं यत्। १सदृशे अमरः। "सकामां दूषयंस्तुल्यो न वधं प्राप्नुयान्नरः"। "सकामां दूषयं स्तु-ल्योनाङ्गुलिच्छेदमाप्नुयात् मनुः"। "कुम्भकर्णः कपीन्द्रेण तुल्यावस्थः स्वसुःकृतः" रघुः। [विड्भिरेकत्र पाने अमरः।

**तुल्यपान** न० तुल्येन सजातीयेन सह पानम्। सजातीयै-

**तुल्ययोगिता** स्त्री अर्थालङ्कारभेदे अलङ्कारभेदे अलङ्कार-शब्दे ३९९पृ० दृश्यम्। ["विम्बीलौटाच्च तुल्यशः" सुस्रु०।

**तुल्यशस्** अव्य० तुल्य+वीप्सार्थे शस्। तुल्यं तुल्यमित्यर्थे।

**तुल्वल** पु० ऋषिभेदे। तौल्वलिशब्दे दृश्यम्।

**तुवर** पु० तवति हिनस्ति रोगान् सौ० तु—ष्वरच् नि० गुणा-भावः। १धान्यभेदे २कषायरसे च ३तद्वति त्रि० ४आढ-क्याम् ५सौराष्ट्रमृत्तिकायाञ्च स्त्री षित्त्वात् ङीष् स्वार्थे क तुवरिकाप्यत्रैव। रसभेदे पुंस्त्री तद्वति त्रि० अमरः। ६श्मश्रुहीने नरे उणा०।

**तुवरयावनाल** पु० कर्म० धान्यभेदे राजनि०। "तुवरो यावनालस्तु कषायोष्णो विरेचकः। संग्राही वातशमनो विदाही शोषकारकः" राजनि०।

**तुवरिका** स्त्री० तुवरोऽस्त्यस्याः ठन्। १सौराष्ट्रमृत्तिकायां (फटकिरि) अमरः। २आढक्यां (अरहर) भरतः।

**तुवरी** स्त्री तु+ष्वरच् षित्त्वात् ङीष्। १आढक्यां २सौरा-ष्ट्रमृत्तिकायाञ्च (फिटकिरि) राजनि०। (तोरी) इति ३धान्यभेदे भावप्र० तद्गुणास्तत्रोक्ता यथा। "तुवरी ग्राहिणी शीता लघ्वी कफविषास्रजित्। तीक्ष्णोष्णा वह्निदा कण्डूकुष्ठकोठकृमिप्रणुत्"। [चक्रमर्द्दने शब्दच०।

**तुवरीशिम्ब** पु० तुवर्य्या आढक्या इव शिम्बा यस्य। चक्र-

**तुवि** स्त्री० तुम्बी+पृषो०। १तुम्ब्यां। तु—वृत्तौ इन् किच्च। २बहुशब्दार्थे निघण्टुः। "तुविकूर्म्मिर्ऋचावान्" ऋ० ३।३०।३। ऊ—मि वेदे गुणे अकारश्चोत्वम् "तुविग्राभं तुविकूर्म्मिं रभोदाम्" ऋ० ६।२२।५। "ग्रहेरच्। तुविग्राभं बहुग्राहकम्" भा० "तुविशुष्म ! तुवि-क्रतो !" ऋ०८।६८।२वा ङीप्। "सहस्रेषु तुवीमघ !" ऋ० १।२९।१। तुवीमघ कथञ्चन" "स इद्दासं तुवीरवम्" ऋ०१०।९९।६।

**तुविस्** न० तु—वृद्धौ पूर्त्तौ वा इसि किच्च। १वृद्धौ २प्रज्ञायां ३बले च। "यः सप्तरश्मिर्वृषभस्तुविष्मान्" ऋ० २।१२।